दहरं, क्ली, (दह+बाहुलकात् अरः।) सूक्ष्मम्। यथा, श्रीभागवते। १०। ८७। १८।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः।
परिसरपद्धतिं हृदयमारुणयो दहरम्॥"
"आरुणयस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते।" इति तट्टीकायां श्रीधरस्वामी॥
दहरः, पुं, (दहति स्वहृदयनाशनेन सन्तापयतीति। दह+अरः।) मूषिका। स्वल्पम्। भ्राता। बालकः। इति विश्वमेदिन्यौ॥
दहः, पुं, (दहतीति। दह+"स्फायितञ्चीति।" उणां २। १३। इति रक्।) अग्निः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ दावानलः। इत्युणादिकोषः॥ नरकम्। वरुणः। इति संक्षिप्तसारे उणादिवृत्तिः॥ हृदयाकाशम्। यथा, श्रीभागवते। ३। १२। ४४।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः॥"
"दह्रतः हृदयाकाशात्।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ जठरम्। यथा, तत्रैव।४।१।३६।
"पुलस्त्योऽजनयत् पत्न्यामगस्त्यञ्च हविर्भुवि।
सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः॥"
"दह्राग्निः जठराग्निः।" इति श्रीधरस्वामी॥
दा, दाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) दा तु दाने दाण दाने प्रसिद्धोऽयम्। अस्यैव यच्छादेशः। यच्छति। इति दुर्गादासः॥
दा, डु ञ लि दाने। इति कविकल्पद्रुमः॥ (ह्वां-उभं-सकं-अनिट्।) डु, दत्रिमम्। ञ लि, ददाति दत्ते। इति दुर्गादासः॥
दा, ल लूनौ। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, दाति। लूनिश्छेदः। केचित्तु दाप लवने इति पठित्वा पित्त्वाद्दासंज्ञाभावे यणादौ दायते इत्यादि मन्यन्ते। क्रमते तु पित्त्वाभावाद्दासंज्ञायां दीयते इत्येव। इति दुर्गादासः॥
दा, स्त्री, (दा+क्विप्।) शोधनम्। दानम्। छेदः। उपतापः। रक्षा। इति मेदिनी। दे, १॥
दाक्षः, पुं, (ददाति दक्षिणामिति। दा+"इगुपधाज्ञाप्रीकिरः कः।" उणां ३।४०। इति कः।) यजमानः। इत्युणादिकोषः॥ दाता। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
दाक्षकं, क्ली, (दक्ष+वुञ्।) दक्षाणां समूहः। इत्यमरटीकायां रायमुकुटः॥(दाक्षीणां विषयो देशः। दाक्षि+"राजन्यादिभ्यो वुञ्।" ४। २। ५३। इति वुञ्। दाक्षेर्विषये। इति व्याकरणम्॥)
दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री। दक्ष+फिञ्। गौरादित्वात् ङीष्।) अश्विन्यादयो रेवत्यन्ताः सप्तविंशतिस्तारा। इत्यमरः। १। ३। २१॥ दुर्गा। इति मेदिनी। णे, ९६॥ रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (दक्षकन्यामात्रम्। यथा, मार्कण्डेये। ५०। २१।

"बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी।
पत्न्यर्थे प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः॥"
अदितिः। यथा, महाभारते। १। ७५। ९।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा।
मारीचः कश्यपस्तस्यामादित्यान् समजीजनत्॥"
कद्रुः। विनता। यथा, तत्रैव। १। २२। ५।
"जग्मतुः परया प्रीत्या परं पारं महोदधेः।
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा॥")
"दक्षाच्च तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः।
तत्र दाक्षायणीपुत्त्राः सर्व्वे देवाः सवासवाः॥
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा।
सापि दक्षाय सुश्रोणी गौरी दत्ताथ ब्रह्मणा॥
दुहिता त्वं पुरा यासि रुद्रेणोढ़ा महात्मना।
सा च दाक्षायणी देवी पुनर्भूता नृपोत्तम!॥"
इति वराहपुराणम्॥
दन्तीदक्षः। इति रत्नमाला॥ *॥
दाक्षायणीपतिः, पुं, (दाक्षायणीनां अश्विन्यादिनक्षत्राणां पतिः।) चन्द्रः। इति त्रिकाण्डशेषः॥
दाक्षायणीरमणः, पुं, (रमयतीति। रम+ल्युः। दाक्षायणीनां रमणः।) चन्द्रः। इति हलायुधः॥
दाक्षाय्यः, पुं, (दक्षाय्य एव। स्वार्थे अण्।) गृध्रः। इत्यमरः। २। ५। २१॥
दाक्षिकन्था, स्त्री, (दाक्षीणां कन्था। "संज्ञायां कन्थोशीनरेषु।" २। ४। २०। इति उशीनरत्वाभावात् न क्लीवता।) वाह्लीकेषु ग्रामसंज्ञा। इति नपुंसकलिङ्गसंग्रहटीकायां भरतः॥
दाक्षिणात्यः, त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः। दक्षिणा+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ९८। इति त्यक्।) दक्षिणदेशोद्भवः। इति शब्दार्थकल्पतरुः॥ (यथा, महाभारते। ३। २३६। ३।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्यवासिनः॥")
नारिकेलः। इति राजनिर्घण्टः॥
दाक्षिण्यं, क्ली, (दक्षिणस्य भावः। दक्षिण+ष्यञ्।) अनुकूलता। इति हेमचन्द्रः। ६। १३॥(सरलता। यथा, आर्य्यासप्तशत्याम्।६०१।
"सौभाग्यं दाक्षिण्यान्निलुपदिष्टं हरेण तरुणीनाम्।
वामार्द्धमेव देयाः स्ववपुःशिल्पे निवेशयता॥"
परच्छन्दानुवर्त्तनम्। यथा, रघुः। १। ३१।
"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥")
भावविशेषः। तत्तु दक्षिणाचाररूपम्। यथा,
"बालान्तु वामदाक्षिण्यभावाभ्यामपि पूजयेत्।
श्मशानभैरवीं देवीमुग्रतारां तथैव च॥"
अपि च।
"ऋषीन् देवान् पितॄंश्चैव मनुष्यान् भूतसञ्चयान्।
यो यजन् पञ्चभिर्यज्ञैर्मन्त्राणि परिशोधयन्॥

विधिवत् स्नानदानाभ्यां कुर्व्वन् यद्विधिपूजनम्।
क्रियते सरहस्यन्तु तद्दाक्षिण्यमिहोच्यते॥
सर्व्वत्र पितृदेवादौ यस्माद्भवति दक्षिणः।
देवी च दक्षिणा यस्मात्तस्माद्दाक्षिण्यमुच्यते॥"
इति कालिकापुराणे ७७ अध्यायः॥
दाक्षिणार्हं, त्रि। इत्यमरः।३।१।५॥ (दक्षिणे भवम्। दक्षिण+ष्यञ्। दक्षिणभवे। दक्षिणदिक्सम्बन्धिनि च। यथा, आर्य्यासप्तशत्याम्। २८२।
"दाक्षिण्यात् गरिमाणं दधतं सा भानुमेनमवमंस्थाः॥")
दाक्षीपुत्त्रः, पुं, (दाक्ष्याः पुत्त्रः।) पाणिनिमुनिः। इति त्रिकाण्डशेषः॥ (यथा, नैषधे।१९।६१।
"दाक्षीपुत्त्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः॥")
दाक्षेयः, पुं, (दाक्ष्या अपत्यं पुमान्। दाक्षी+"स्त्रीभ्यो ढक्।" ४। १। १२०। इति ढक्।) पाणिनिमुनिः। इति हेमचन्द्रः। ३। ५१५॥
दाक्ष्यं, क्ली, (दक्षस्य भावः कर्म्म वा। दक्ष+ष्यञ्।) दक्षता। निपुणता। दक्षशब्दात् भावे ष्यप्रत्ययः॥ (यथा, महाभारते।२।३८।२०।
"दानं दाक्ष्यं श्रुतं शौर्य्यं ह्रीः कीर्त्तिर्बुद्धिरुत्तमा।
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते॥")
दाड़कः, पुं, (दालयति सुखाभ्यन्तरस्थद्रव्यं विचूर्णीकरोतीति। दल+णिच्+ण्वुल्। लस्य डः।) दन्तः। इति शब्दार्थकल्पतरुः॥
दाड़िमः, त्रि, (दलनमिति दालः। तेन निर्वृत्तः। भावप्रत्ययन्तादिमप्। डलयोरेकत्वम्।) एला। इति मेदिनी मे, ४४॥ फलवृक्षविशेषः। (यथा, देवीभागवते। १। १२। ८।
"दाड़िमैर्नारिकेलैश्च माधवीमण्डपावृतम्॥")
तत्पर्य्यायः। करकः २। इत्यमरः। २।४।६५॥ पिण्डपुष्पः ३ दाड़िम्बः ४ पर्व्वरुक् ५ खाड़वः ६ पिण्डीरः ७ फलषाड़वः ८ शुकवल्लभः ९। इति त्रिकाण्डशेषः॥ रक्तपुष्पः १०। इति रत्नमाला॥ दाड़िमीसारः ११ कुट्टिमः १२ फलखाड़वः १३ स्वाद्वम्लमध्योऽपि। रक्तबीजः १४ सुफलः १५ दन्तबीजकः १६ मधुबीजः १७ कुचफलः १८ रोचनः १९ मणिबीजः २० वल्कफलः २१ वृत्तफलः २२ सुनीलः २३ नीलपत्रः २४। अस्य गुणाः। मधुराम्लत्वम्। कषायत्वम्। कासवातकफश्रमपित्तविनाशित्वम्। ग्राहित्वम्। दीपनत्वम्। लघुत्वम्। उष्णत्वम्। शीतलत्वम्। रुचिदातृत्वञ्च। इति राजनिर्घण्टः॥ हृद्यत्वम्। अम्लत्वम्। श्वासारुचिदृष्यत्वनाशित्वम्। कण्ठशोधनत्वम्। कफपित्ताविरोधित्वञ्च॥*॥
"द्विविधं तत्तु विज्ञेयं मधुरञ्चाम्लमेव च।
मधुरं तत् त्रिदोषघ्नमम्लं वातकफापहम्॥"
इति राजवल्लभः॥
तापहारि मधुरं लघु पथ्यम्। इति राजनिर्घण्टः॥
"तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम्।